तुराषाट् ड्- तुरासाहौ, तुरासाहः१ तुरासाहम्, तुरासाहौ तुरासाहः २ तुरासाहा, तुराषाड्भ्याम्, तुराषाड्भिः ३ तुरासाहे, तुराषाड्भ्याम्, तुराषाड्भ्यः ४ तुरासाहः तुराषाड्भ्याम्, तुराषाड्भ्यः ५ तुरासाहः, तुरासाहोः, तुरासाहाम् ६ तुरासाहि, तुरासाहोः, तुराषाट्त्सु तुराषाट्सु ७ स० प्रथमावत्

(सुदिव् शब्दः) श्रेष्ठ आकाश।

सुद्यौः, सुदिवौ, सुदिवः, १ सुदिवम् सुदिवौ, सुदिवः २ सुदिवा, सुद्युभ्याम्, सुद्युभिः ३ सुदिवे, सुद्युभ्याम्, सुद्युभ्यः ४ सुदिवः, सुद्युभ्याम्, सुद्युभ्यः ५ सुदिवः, सुदिवोः, सुदिवाम् ६ सुदिवि, सुदिवोः, सुद्युषु ७ सं० प्रथमावत्॥

(रेफान्त चतुर् शब्दः) चार

चत्वारः १ चतुरः २ चतुर्भिः ३ चतुर्भ्यः ४, ५ चतुर्णाम् ६ चतुर्षु ॥ ७॥

(प्रशाम् शब्दः) अतिशान्त ।

प्रशान्,प्रशामौ,प्रशामः १ प्रशामम्, प्रशामौ, प्रशामः २ प्रशामा प्रशान्भ्याम्, प्रशान्भिः ३ प्रशामे प्रशान्भ्याम्, प्रशान्भ्यः ४ प्रशामः, प्रशान्भ्याम्, प्रशान्भ्यः ५ प्रशामः, प्रशामोः, प्रशामाम् ६ प्रशामि, प्रशामोः, प्रशान्सु ७ स० हे प्रशान्! हे प्रशामौ ! हे प्रशामः ॥

(इदम् शब्दः) यह ।

१ अयम्, इमौ, इमे २ इमम्, इमौ, एनौ, इमान् एनान् ३ अनेन एनेन, आभ्याम्, एभिः ४ अस्मै, आभ्याम्, एभ्यः ५ अस्मात्, आभ्याम्, एभ्यः, ६ अस्य, अनयोः, एनयोः एषाम् ७ अस्मिन्, अनयोः एनयोः, एषु ॥

(राजन् शब्दः) राजा

राजा, राजानौ, राजानः १ राजानम् राजानौ, राज्ञः, २ राज्ञा राजभ्याम्, राजभिः ३ राज्ञे, राजभ्याम्, राजभ्यः ४ राज्ञः राजभ्याम्, राजभ्यः ५ राज्ञः, राज्ञोः, राज्ञाम् ६ राज्ञि, राजनि, राज्ञोः, राजसु ७ स० हे राजन् ! हे राजानौ ! हे राजानः ॥

(यज्वन् शब्दः) यज्ञ करनेवाला ।

यज्वा, यज्वानौ, यज्वानः १ यज्वानम्, यज्वानौ,

यज्वन: २ यज्वना, यज्वभ्याम् यज्वभि: ३ यज्वने, यज्वभ्याम्, यज्वभ्य: ४ यज्वन:, यज्वभ्याम्, यज्वभ्य: ५ यज्वन:, यज्वनो:, यज्वनाम् ६ यज्वनि, यज्वनो:, यज्वसु ७ स० हे यज्वन्, हे यज्वानौ, हे यज्वान: ।

इसी प्रकार ब्रह्मन् शब्द के रूप होते हैं ॥

(वृत्रहन् शब्द:) बादल को दूर करनेवाला ।

वृत्रहा, वृत्रहणौ, वृत्रहण: १ वृत्रहणम्, वृत्रहणौ, वृत्रघ्न: २ वृत्रघ्ना, वृत्रहभ्याम्, वृत्रहाभि: ३ वृत्रघ्ने, वृत्रहभ्याम् वृत्रहभ्य: ४ वृत्रघ्न:, वृत्रहभ्याम्, वृत्रहभ्य: ५ वृत्रघ्न:, वृत्रघ्नो:, वृत्रघ्नाम् ६ वृत्रहणि, वृत्रघ्नि, वृत्रघ्नो:, वृत्रहसु ७ स० हे वृत्रहन् हे वृत्रहणौ, हे वृत्रहण: । इसी प्रकार शार्ङ्गिन् (धनुषधारी) यशस्विन् (यशवाला) अर्यमन् (सूर्य) शब्दों के रूप होते हैं ।

(मघवन् शब्द:) सूर्य, बिजली ।

मघवान्, मघवन्तौ, मघवन्त: १ मघवन्तम्, मघवन्तौ, मघवत: २ मघवता, मघवद्भ्याम्, मघवद्भि: ३ मघवते, मघवद्भ्याम् मघवद्भ्य: ४ मघवत:, मघवद्भ्याम्, मघवद्भ्य: ५ मघवत:, मघवतो:, मघवताम् ६ मघवति, मघ-

वतोः, मघवत्सु ७स० हे मघवन् ! हे मघवन्तौ, हे मघवन्तः॥

मघवा, मघवानौ, मघवानः १ मघवानम्, मघवानौ, मघोनः २ मघोना, मघवभ्याम्, मघवभिः ३ मघोने मघवभ्याम्, मघवभ्यः ४ मघोनः, मघवभ्याम् मघवभ्यः ५ मघोनः मघोनोः मघोनाम् ६ मघोनि मघोनोः, मघवसु ७ स० हे मघवन् ! हे मघवानौ, हे मघवानः ॥

(युवन् शब्दः) जवान ।

युवा, युवानौ, युवानः १ युवानम्, युवानौ यूनः २ यूना युवभ्याम्, युवभिः ३ यूने, युवभ्याम्, युवभ्यः ४ यूनः, युवभ्याम्, युवभ्यः ५ यूनः, यूनोः, यूनाम् ६ यूनि, यूनोः युवसु ७ स० हे युवन् ! हे युवानौ, हे युवानः ॥

(अर्वन् शब्दः) घोड़ा ।

अर्वा, अर्वन्तौ, अर्वन्तः १ अर्वन्तम्, अर्वन्तौ, अर्वतः २ अर्वता, अर्वद्भ्यम्, अर्वद्भिः ३ अर्वते, अर्वद्भ्याम्, अर्वद्भ्यः ४ अर्वतः, अर्वद्भ्याम् अर्वद्भ्यः ५ अर्वतः, अर्वतोः, अर्वताम् ६ अर्वति, अर्वतोः अर्वत्सु ७ स हे अर्वन् हे अर्वन्तौ, हे अर्वन्तः ॥

प्राची = पूर्व, मशरक़ । प्रतीची = पश्चिम, मगरब ।

उदीची = उत्तर, शुमाल । अवाचा = दक्षिण, जनूब । आग्नेयी = पूर्व और दक्षिण के बीचकी दिशा । नैर्ऋती = दक्षिण और पश्चिम के मध्य की दिशा । वायवी = पश्चिम और उत्तरके बीचकी दिशा। ऐशानी = उत्तर और पूर्व के बीच की दिशा। राजकीयम् = सरकारी। यौष्माकीणम् = तुम्हारा । आस्माकीनम् = हमारा । तावकीनम् = तेरा । मामकीनम् = मेरा । सायन्तनम् = शामका । प्रातस्तनम् = सुबह का । श्वस्तनम् = आगामी कलका । ह्यस्तनम् = गयेकलका । दोषातनम् = रात्रिका । ईषद्धसनम् = मुसकराना । परिसर्गः = लपेटना । परिष्कारः = सजावट मार्जनम् = शुद्ध करना ।

(पथिन् शब्दः) मार्ग ।

पन्थाः, पन्थानौ, पन्थानः १ पन्थानम्, पन्थानौ, पथः २ पथा, पथिभ्याम्, पथिभिः ३ पथे, पथिभ्याम्, पथिभ्यः ४ पथः, पथिभ्याम्, पथिभ्यः ५ पथः, पथोः, पथाम् ६ पथि, पथोः, पथिषु ७ इसी प्रकार मथिन् (बिलोने वाला) ऋभुक्षिन् (अन्तरिक्ष) शब्दों के रूप जानो ॥

(नान्त[1] पञ्चन् शब्दः) पांच ।

पञ्च १ पञ्च २ पञ्चभिः ३ पञ्चभ्यः ४, ५ पञ्चानाम्

---

१ पञ्चन्, सप्तन्, अष्टन्, नवन्, दशन् शब्दों के रूप तीनों लिङ्गों में सम होते हैं ॥

६ पञ्चसु ७ इसी प्रकार सप्तन् (सात) नवन् (नौ) दशन् (दस) शब्दों के रूप होते हैं।

(अष्टन् शब्दः) आठ।

अष्टौ, अष्ट १ अष्टौ, अष्ट २ अष्टभिः, अष्टाभिः ३ अष्टभ्यः, अष्टाभ्यः ४ अष्टभ्यः, अष्टाभ्यः ५ अष्टानाम् ६ अष्टसु, अष्टासु ७ ॥

(ऋत्विज् शब्दः) हवनकर्त्ता।

ऋत्विक्,-ग्, ऋत्विजौ, ऋत्विजः १ ऋत्विजम्, ऋत्विजौ, ऋत्विजः २ ऋत्विजा, ऋत्विग्भ्याम्, ऋत्विग्भिः ३ ऋत्विजे, ऋत्विग्भ्याम्, ऋत्विग्भ्यः ४ ऋत्विजः, ऋत्विग्भ्याम्, ऋत्विग्भ्यः, ५ ऋत्विजः, ऋत्विजोः, ऋत्विजाम् ६ ऋत्विजि, ऋत्विजोः, ऋत्विक्षु ७ स० प्रथमावत्।

(भाषा बनाओ)

एभिर्बालकैरिदानीं जलं न पीतम् पीत्वाऽऽगमिष्यन्ति। आस्माकीना वडवा प्राच्यां गतोदीच्यां वा। वयमिदानीं प्रतीच्या आगच्छामोऽतो न जानीमः। ह्यस्तनं तावकीनं किं कार्यमस्ति। सायन्तनस्य कार्यस्य स्मृतिरस्ति नास्ति वा?। नगरस्यैशान्यां मुरादाबादस्य राजकीया महती पाठशालास्ति।

(संस्कृत बनाओ)

ये किस राजके घोड़े हैं क्या आप जानते हैं? । यह तुम्हारे आठ दिनका काम है या दशका? । इस वनमें चार रास्ते हैं इस लिये मैं किस रास्ते से जाऊँ । तुम सब आठ आदमियों में से युद्धके लिये कौन जायगा । जवानोंका काम जवान ही करते हैं लड़के नहीं करते ।

(युज् शब्दः) मिलनेवाला ।

युङ्, युञ्जौ, युञ्जः १ युञ्जम्, युञ्जौ, युजः २ युजा, युग्भ्याम्, युग्भिः ३ युजे, युग्भ्यम्, युग्भ्यः ४ युजः, युग्भ्याम्, युग्भ्यः ५ युजः, युजोः, युजाम् ६ युजि, युजोः, युक्षु ७ स० प्रथमावत् ॥

(सुयुज् शब्दः) सम्यग् मिला हुआ)

सुयुक् ग् सुयुजौ, सुयुजः १ सुयुजम्, सुयुजौ, सुयुजः २ सुयुजा, सुयुग्भ्याम्, सुयुग्भिः ३ सुयुजे, सुयुग्भ्याम्, सुयुग्भ्यः ४ सुयुजः सुयुग्भ्याम्, सुयुग्भ्यः ५ सुयुजः, सुयुजोः, सुयुजाम् ६ सुयुजि, सुयुजोः, सुयुक्षु ७ स० प्रथमावत् ॥

(खञ्ज् शब्दः) लूला ।

खन, खञ्जौ, खञ्जः १ खञ्जम्, खञ्जौ, खञ्जः १

खञ्जा, खन्भ्याम्, खन्भिः ३ खञ्जे, खन्भ्याम्, खन्भ्यः ४ खञ्जः, खन्भ्याम्, खन्भ्यः ५ खञ्जः, खञ्जोः, खञ्जाम् ६ खञ्जि, खञ्जोः खन्सु ७ स० प्रथमावत् ॥

(विश्वराज् शब्दः) ईश्वर ।

विश्वाराट्-ड्, विश्वराजौ, विश्वराजः १ विश्वराजम्, विश्वराजौ, विश्वराजः २ विश्वराजा, विश्वराड्भ्याम्, विश्वाराड्भिः ३ विश्वराजे, विश्वाराड्भ्याम्, विश्वाराड्भ्यः ४ विश्वराजः, विश्वाराड्भ्याम्, विश्वाराड्भ्य ५ विश्वराजः विश्वराजोः, विश्वराजाम् ६ विश्वराजि, विश्वराजोः, विश्वाराट्त्सु, विश्वाराट्सु ७ स० प्रथमावत् ॥

(भृस्ज् शब्दः) भून)(ज)ना

भृट्-ड्, भृज्जौ, भृज्जः १ भृज्जम्, भृज्जौ, भृज्जः २ भृज्जा, भृड्भ्याम्, भृड्भिः ३ भृज्जे, भृड्भ्याम्, भृड्भ्यः ४ भृज्जः, भृड्भ्याम् भृड्भ्यः ५ भृज्जः, भृज्जोः, भृज्जाम् ६ भृज्जि, भृज्जोः, भृट्त्सु भृट्सु ७ स० प्रथमावत् ॥

(त्यद् शब्दः) वह ।

स्यः, त्यौ, त्ये, १ त्यम्, त्यौ, त्यान् २ त्येन, त्याभ्याम्, त्यैः ३ त्यस्मै, त्याभ्याम्, त्येभ्यः ४ त्यस्मात्, त्याभ्याम्,

त्येभ्यः ५ त्यस्य, त्ययोः त्येषाम् ६ त्यस्मिन्, त्ययोःत्येषु

(एतद् शब्दः) यह

एषः, एतौ, एते, १ एतम् एनम्, एतौ एनौ, एतान् एनान् २ एतेन एनेन, एताभ्याम्, एतैः ३ एतस्मै, एताभ्याम्, एतेभ्यः ४ एतस्मात्, एताभ्याम्, एतेभ्यः ५ एतस्य, एतयोः एनयोः एतेषाम् ६ एतस्मिन, एतयोः एनयोः, एतेषु ७

(सुपाद् शब्दः) अच्छे पैर वाला

सुपाद्-त्, सुपादौ सुपादः १ सुपादम्, सुपादौ सुपदः २ सुपदा, सुपाद्भ्याम्, सुपाद्भिः ३ सुपदे, सुपाद्भ्याम्, सुपाद्भ्यः ४ सुपदः, सुपाद्भ्याम्, सुपाद्भ्यः, ५ सुपदः सुपदोः, सुपदाम् ६ सुपादि, सुपदोः, सुपात्सु ७ सं० प्रथमावत्॥

(अग्निमथ् शब्दः) अग्नि मथने वाला।

अग्निमद्-त्, अग्निमथौ, अग्निमथः १ अग्निमथम्, अग्निमथौ, अग्निमथः २ अग्निमथा अग्निमद्भ्याम्, अग्निमद्भिः ३ अग्निमथे, अग्निमद्भ्याम्, अग्निमद्भ्यः ४ अग्निमथः, अग्निमद्भ्याम्, अग्निमद्भ्यः ५ अग्निमथः अग्निमथोः, अग्निमथाम् ६ अग्निमथि, अग्निमथोः, अग्निमत्सु ७

(प्राञ्च् शब्दः) पूर्वदिशा।

प्राङ्, प्राञ्चौ, प्राञ्चः १ प्राञ्चम्, प्राञ्चौ, प्राचः २ प्राचा, प्राग्भ्याम्, प्राग्भिः ३ प्राचे, प्राग्भ्याम्, प्राग्भ्यः, ४ प्राचः, प्राग्भ्याम्, प्राग्भ्यः ५ प्राचः, प्राचोः, प्राचाम् ६ प्राचि, प्राचोः प्राक्षु ७ स प्रथमावत् ॥

(प्रत्यञ्च् शब्दः) उत्तर दिशा

प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः १ प्रत्यञ्चम्, प्रत्यञ्चौ, प्रतीचः २ प्रतीचा, प्रत्यग्भ्याम्, प्रत्यग्भिः ३ प्रतीचे, प्रत्यग्भ्याम्, प्रत्यग्भ्यः ४ प्रतीचः, प्रत्यग्भ्याम्, प्रत्यग्भ्यः ५ प्रतीचः, प्रतीचोः, प्रतीचाम् ६ प्रतीचि, प्रतीचोः, प्रत्यक्षु ७ स० प्रथमावत्।

(उदञ्च्शब्दः) उत्तरदिशा

उदङ्, उदञ्चौ, उदञ्चः १ उदञ्चम्, उदञ्चौ, उदीचः २ उदीचा, उदग्भ्याम्, उदग्भिः ३ उदीचे, उदग्भ्याम्, उदग्भ्यः ४ उदीचः उदग्भ्याम्, उदग्भ्यः ५ उदीचः उदीचोः, उदीचाम् ६ उदीचि, उदीचोः, उदक्षु ७ स० प्रथमावत् ॥

(सम्यञ्च्शब्दः) मनोहर

सम्यङ्, सम्यञ्चौ, सम्यञ्चः १ सम्यञ्चम्, सम्यञ्चौ, समीचः २ समीचा, सम्यग्भ्याम्, सम्यग्भिः ३ समीचे,

सम्यग्भ्याम्, सम्यग्भ्यः ४ समीचः सम्यग्भ्याम्, सम्यग्भ्यः ५ समीचः, समीचोः, समीचाम् ६ समीचि, समीचोः सम्यक्षु ७ स० प्रथमावत् ॥

(सध्र्यञ्च् शब्दः) साथ चलनेवाला

सध्र्यङ्, सध्र्यञ्चौ, सध्र्यञ्चः १ सध्र्यञ्चम्, सध्र्यञ्चौ, सध्रीचः २ सध्रीचा, सध्र्यग्भ्याम्, सध्र्यग्भिः ३ सध्रीचे, सध्र्यग्भ्याम्, सध्र्यग्भ्यः ४ सध्रीचः सध्र्यग्भ्याम्, सध्र्यग्भ्यः ५ सध्रीचः, सध्रीचोः, सध्रीचाम् ६ सध्रीचि, सध्रीचोः, सध्र्यक्षु ७ स० प्रथमावत् ॥

(तिरसञ्च् शब्दः) तिरछी चालवाला ।

तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः १ तिर्यञ्चम्, तिर्यञ्चौ, तिरश्चः २ तिरश्चा, तिर्यग्भ्याम्, तिर्यग्भिः ३ तिरश्चे, तिर्यग्भ्याम्, तिर्यग्भ्यः ४ तिरश्चः, तिर्यग्भ्याम्, तिर्यग्भ्यः ५ तिरश्चः, तिरश्चोः तिरश्चाम् ६ तिरश्चि, तिरश्चोः, तिर्यक्षु ७ स० प्रथमावत् ।

(प्राञ्च् शब्दः) पूजावाचक ।

प्राङ्, प्राञ्चौ, प्राञ्चः १ प्राञ्चम्, प्राञ्चौ, प्राञ्चः २ प्राञ्चा, प्राङ्भ्याम्, प्राङ्भिः ३ प्राञ्चे, प्राङ्भ्याम् प्राङ्भ्यः ४ प्राञ्चः,

माङ्भ्याम्, माङ्भ्यः ५ माञ्चः, माञ्चोः माञ्चाम् ६ माञ्चि माञ्चोः माङ्षु-माङ्क्षु ७ स० प्रथमावत् ॥

(क्रुञ्च् शब्दः) तिरछा चलनेवाला ।

क्रुङ्, क्रुञ्चौ, क्रुञ्चः १ क्रुञ्चम्, क्रुञ्चौ, क्रुञ्चः २ क्रुञ्चा, क्रुङ्भ्याम्, क्रुङ्भिः ३ क्रुञ्चे, क्रुङ्भ्याम्, क्रुङ्भ्यः ४ क्रुञ्चः, क्रुङ्भ्याम्, क्रुङ्भ्यः ५ क्रुञ्चः, क्रुञ्चोः, क्रुञ्चाम् ६ क्रुञ्चि, क्रुञ्चोः, क्रुङ्षु क्रुङ्क्षु ७ स० प्रथमावत् ॥

लवपुरम् = लाहौर । जयपुरम् = जयपुर । योधपुरम् = जोधपुर । उदयपुरम् = उदयपुर । लक्ष्मणपुरम् = लखनौ । पुरुषपुरम् = पेशावर । कर्णपुरम् = कानपुर । वाराणसी = बनारस । प्रयागः = इलाहाबाद । कालिकता = कलकत्ता । मुम्बापुरी = बम्बई । मयराष्ट्रम् = मेरठ । अजमीढः = अजमेर । सुघ्नः = आगरा । पाटलिपुत्रम् = पटना । अवन्तिपुरी = उज्जैन । कृष्णपुरी = मथुरा ॥

(पयोमुच् शब्दः) बादल ।

पयोमुक्-ग्, पयोमुचौ, पयोमुचः १ पयोमुचम्, पयोमुचौ, पयोमुचः २ पयोमुचा, पयोमुग्भ्याम्, पयोमुग्भिः ३ पयोमुचे, पयोमुग्भ्याम्, पयोमुग्भ्यः ४ पयोमुचः, पयोमु-

भ्याम्, पयोमुग्भ्यः ५ पयोमुचः, पयोमुचोः, पयोमुचाम् ६ पयोमुचि, पयोमुचोः पयोमुक्षु ७ स० प्रथमावत् ॥

(महत् शब्दः) बड़ा ।

महान्, महान्तौ, महान्तः १ महान्तम्, महान्तौ, महतः २ महता, महद्भ्याम्, महद्भिः ३ महते, महद्भ्याम्, महद्भ्यः ४ महतः, महद्भ्याम्, महद्भ्यः ५ महतः महतोः, महताम् ६ महति, महतोः, महत्सु ७ स० हे महन् ! हे महान्तौ, हे महान्तः ।

(ददत् शब्दः) देता हुआ

ददत्, ददतौ, ददतः १ ददतम्, ददतौ, ददतः २ ददता, ददद्भ्याम्, ददद्भिः ३ ददते, ददद्भ्याम्, ददद्भ्यः ४ ददतः, ददद्भ्याम्, ददद्भ्यः ५ ददतः, ददतोः, ददताम् ६ ददति, ददतोः ददत्सु ७ स० प्रथमावत् इसी प्रकार जक्षत् (खाताहुआ) जाग्रत् (जागताहुआ)

दरिद्रत् (कंगाल होताहुआ) शासत् (शिक्षा करताहुआ) चकाशत् (प्रकाश करता हुआ) के रूप होते हैं

(तादृश शब्दः) तैसा

तादृक्-ग्, तादृशौ, तादृशः १ तादृशम्, तादृशौ, तादृशः

२ तादृशा, तादृग्भ्याम्, तादृग्भिः ३ तादृशे, तादृग्भ्याम्, तादृग्भ्यः ४ तादृशः तादृग्भ्याम्, तादृग्भ्यः ५ तादृशः, तादृशोः, तादृशाम् ६ तादृशि, तादृशोः, तादृक्षु ७ स० प्रथमावत्

(विश् शब्दः) प्रवेशकर्त्ता

विट्-विड्, विशौ, विशः १ विशम् विशौ, विशः २ विशा, विड्भ्याम्, विड्भिः ३ विशे, विड्भ्याम्, विड्भ्यः ४ विशः, विड्भ्याम्, विड्भ्यः ५ विशः विशोः, विशाम् ६ विशि, विशोः, विट्त्सु, विट्सु ७ स० प्रथमावत् ॥

(नश्शब्दः) नाशवान्

नक्-ग्, ट् ड्, नशौ, नशः १ नशम्, नशौ, नशः २ नशा, नड्-ग्भ्याम्, नड्-ग्भिः ३ नशे, नड्-ग्भ्याम्, नड्-ग्भ्यः ४ नशः नड्-ग्भ्याम्, नड्-ग्भ्यः ५ नशः, नशोः नशाम् ६ नशि, नशोः, नक्षु, नट्त्सु-नट्सु ७ स० प्रथमावत्

(भाषा बनाओ)

युष्माकं युञ्जः खञ्जः सन्ति । एते राजानो विश्वराजि विश्वासं कुर्वन्ति । तस्मै सुपदे नमोऽस्तु मे । एतस्याऽग्निमथो भूज्जः पात्रं वरं नास्ति । भवतस्तरवो नगरात् प्राचि प्रतीचि उदीचि वा दिशि सन्ति । तिरश्चां कुटिला गतिः । यादृक् करणं तादृक् भरणम् मितीश्वरीयानियमः ।

(षष् शब्दः) छः

षट्-ड् १ षट्-ड् २ षड्भिः ३ षड्भ्यः, षड्भ्यः ५ षण्णाम् ६ षट्त्सु, षट्सु ७

(पिपठिस् शब्दः) पढ़ने की इच्छा करनेवाला

पिपठीः, पिपठिषौ, पिपठिषः, १ पिपठिषम्, पिपठिषौ पिपठिषः २ पिपठिषा, पिपठीर्भ्याम्, पिपठीर्भिः ३ पिपठिषे, पिपठीर्भ्याम्, पिपठीर्भ्यः ४ पिपठिषः, पिपठीर्भ्याम्। पिपठीर्भ्यः५ पिपठिषः, पिपठिषोः, पिपठिषाम् ६ पिपठिषि, पिपठिषोः, पिपठीःषु-ष्षु ७ सं० प्रथमावत् ॥

(चिकीर्ष् शब्दः) करनेकी इच्छा करनेवाला।

चिकीः, चिकीर्षौ, चिकीर्षः १ शेष रूप पिपठिष्वत् ॥

(विद्वस् शब्दः) आलिम।

विद्वान, विद्वांसौ, विद्वांसः१ विद्वांसम्, विद्वांसौ, विदुषः२ विदुषा, विद्वद्भ्याम्, विद्वद्भिः ३ विदुषे, विद्वद्भ्याम्, विद्वद्भ्यः ४ विदुषः, विद्वद्भ्याम्, विद्वद्भ्यः ५ विदुषः विदुषोः विदुषाम् ६ विदुषि, विदुषोः विद्वत्सु ७ हे विद्वन्! हे विद्वांसौ, हे विद्वांसः ॥

(पुंस् शब्दः) पुरुष।

पुमान्, पुमांसौ, पुमांसः १ पुमांसम्, पुमांसौ, पुंसः २

पुंसा, पुंभ्याम्, पुंभिः ३ पुंसे, पुंभ्याम्, पुंभ्यः ४ पुंसः, पुंभ्याम्, पुंभ्यः ५ पुंसः, पुंसोः, पुंसाम् ६ पुंसि, पुंसोः, पुंसु ७ हे पुमन्, हे पुमांसौ, हे पुमांसः ।

(उशनस् शब्दः) शुक्र ।

उशना, उशनसौ, उशनसः १ उशनसम्, उशनसौ, उशनसः २ उशनसा, उशनोभ्याम्, उशनोभिः ३ उशनसे, उशनोभ्याम्, उशनोभ्यः ४ उशनसः, उशनोभ्याम्, उशनोभ्यः ५ उशनसः उशनसोः, उशनसाम् ६ उशनसि, उशनसोः, उशनस्सु ७ स० हे उशनन्—उशनः—उशन, हे उशनसौ, हे उशनसः ॥

(अनेहस् शब्दः) समय

अनेहा, अनेहसौ, अनेहसः १ अनेहसम्, अनेहसौ, अनेहसः २ अनेहसा, अनेहोभ्याम्, अनेहोभिः ३ अनेहसे, अनेहोभ्याम्, अनेहोभ्यः ४ अनेहसः, अनेहोभ्याम्, अनेहोभ्यः ५ अनेहसः, अनेहसोः, अनेहसाम्, ६ अनेहसि, अनेहसोः, अनेहस्सु, ७ स० हे अनेहः! हे अनेहसौ, हे अनेहसः

(वेधस् शब्दः) विधाता

वेधाः, वेधसौ, वेधसः १ शेषरूप अनेहस्वत् ॥

(अदस् शब्दः) वह

असौ, अमू, अमी १ अमुम्, अमू, अमून् २ अमुना, अमूभ्याम्, अमीभिः ३ अमुष्मै, अमूभ्याम्, अमीभ्यः ४ अमुष्मात्, अमूभ्याम्, अमीभ्यः ५ अमुष्य, अमुयोः अमीषाम् ६ अमुष्मिन्, अमुयोः, अमीषु ७ ॥

(धनिन् शब्दः) धनवान्

धनी, धनिनौ, धनिनः १ धनिनम्, धनिनौ, धनिनः २ धनिना, धनिभ्याम्, धनिभिः ३ धनिने, धनिभ्याम्, धनिभ्यः ४ धनिनः, धनिभ्याम्, धनिभ्यः ५ धनिनः, धनिनोः, धनिनाम् ६ धनिनि, धनिनोः, धनिषु ७ स० हे धनिन् ! हे धनिनौ हे धनिनः

(क्वसु प्रत्ययान्त तस्थिवस् शब्दः) ठहरा हुआ ।

तस्थिवान्, तस्थिवांसौ, तस्थिवांसः १ तस्थिवांसम्, तस्थिवांसौ, तस्थुषः २ तस्थुषा, तस्थिवद्भ्याम्, तस्थिवद्भिः ३ तस्थुषे, तस्थिवद्भ्याम्, तस्थिवद्भ्यः ४ तस्थुषः, तस्थिवद्भ्याम्, तस्थिवद्भ्यः ५ तस्थुषः, तस्थुषोः, तस्थुषाम् ६ तस्थुषि, तस्थुषोः, तस्थिवत्सु ७ स० हे तस्थिवन् ! ॥

(शुश्रुवस् शब्दः) सुनता हुआ

शुश्रुवान्, शुश्रुवांसौ, शुश्रुवांसः १ शुश्रुवांसम्, शुश्रुवां-

सौ, शुश्रुवुषः २ शुश्रुवुषा, शुश्रुवद्भ्याम्, शुश्रुवद्भिः ३ शुश्रुवुषे, शुश्रुवद्भ्याम्, शुश्रुवद्भ्यः ४ शुश्रुवुषः, शुश्रुवद्भ्याम्, शुश्रुवद्भ्यः ५ शुश्रुवुषः, शुश्रुवुषोः, शुश्रुवुषाम् ६ शुश्रुवुषि शुश्रुवुषोः, शुश्रुवत्सु ७ । स० हे शुश्रुवन् ! ॥

इति हलन्तपुँल्लिङ्गप्रकरणम् ॥

बलिष्ठः = बहुतबलवान् । कनिष्ठः = छोटा । घनिष्ठः = बहुत गाढा । दविष्ठम् = बहुतदूर । पटिष्ठः = बहुतचतुर । धर्मिष्ठः = बहुत धर्मात्मा । पापिष्ठः = बडा पापी । भूयिष्ठम् = बहुतही । हस्ताक्षेपः = दस्तन्दाजी ॥

अथ हलन्तस्त्रीलिङ्ग प्रकरणम् ।

(हान्त उपानह् शब्दः) जूता

उपानत्, द् उपानहौ, उपानहः १ उपानहम्, उपानहौ, उपानहः २ उपानहा, उपानद्भ्याम्, उपानद्भिः ३ उपानहे उपानद्भ्याम्, उपानद्भ्यः ४ उपानहः, उपानद्भ्याम्, उपानद्भ्यः ५ उपानहः, उपानहोः, उपानहाम् ६ उपानहि, उपानहोः, उपानत्सु ७ स० प्रथमावत ॥

(हान्त उष्णिह् शब्दः)

उष्णिक्, ग्, उष्णिहौ, उष्णिहः १ उष्णिहम्, उष्णिहौ,

उष्णिहः २ उष्णिहा, उष्णिग्भ्याम्, उष्णिग्भिः ३ उष्णिहे उष्णिग्भ्याम्, उष्णिग्भ्यः ४ उष्णिहः, उष्णिग्भ्याम्, उष्णिग्भ्यः ५ उष्णिहः, उष्णिहोः, उष्णिहाम् ६ उष्णिहि, उष्णिहोः, उष्णिक्षु ७ सं० प्रथमावत् ।

(वान्तो दिव् शब्दः) आकाश

द्यौः, दिवौ, दिवः १ दिवम्, दिवौ, दिवः २ दिवा, द्युभ्याम्, द्युभिः ३ दिवे, द्युभ्याम्, द्युभ्यः ४ दिवः, द्युभ्याम्, द्युभ्यः ५ दिवः दिवोः, दिवाम् ६ दिवि, दिवोः द्युषु

(रेफान्तो गिर् शब्दः) वचन

गीः, गिरौ, गिरः १ गिरम्, गिरौ, गिरः २ गिरा, गीर्भ्याम्, गीर्भिः ३ गिरे, गीर्भ्याम् गीर्भ्यः ४ गिरः, गीर्भ्याम्, गीर्भ्यः ५ गिरः, गिरोः, गिराम् ६ गिरि, गिरोः, गीर्षु ॥ एवं 'पुर्' शब्दस्यरूपाणि विज्ञेयानि ॥

(रेफान्तश्चतुर् शब्दः) चार

चतस्रः १ चतस्रः २ चतसृभिः ३ चतसृभ्यः ४ चतसृभ्यः ५ चतसृणाम् ६ चतसृषु ॥

(मान्तः किम् शब्दः) कौन

का, के, काः १ काम्, के, काः २ कया, काभ्याम्,

काभिः ३ कस्यै, काभ्याम्, काभ्यः ४ कस्याः, काभ्याम्, काभ्यः ५ कस्याः, कयोः, कासाम् ६ कस्याम्, कयोःकासु॥

(मान्त इदम्शब्दः) यह

इयम्, इमे, इमाः १ इमाम्, एनाम् इमे, एने इमाः एनाः २ अनया, एनया आभ्याम्, आभिः ३ अस्यै, आभ्याम्, आभ्यः ४ अस्याः आभ्याम्, आभ्यः ५ अस्याः, अनयोः, एनयोः आसाम् ६ अस्याम्, अनयोः, एनयोः आसु।

(दान्तस्त्यद् शब्दः)

स्या, त्ये, त्याः १ त्याम्, त्ये, त्याः २ त्यया, त्याभ्याम्, त्याभिः ३ त्यस्यै, त्याभ्याम्, त्याभ्यः ४ त्यस्याः, ताभ्याम्, त्याभ्यः ५ तस्याः, तयोः, त्यासाम् ६ त्यस्याम्, त्ययोः, त्यासु ॥ एव मेव तद् यद् एतद् शब्दानां रूपाणि बोध्यानि ॥

(चान्तः वाच्शब्दः) वाणी

वाक्, ग्, वाचौ, वाचः १ वाचम्, वाचौ, वाचः २ वाचा, वाग्भ्याम्, वाग्भिः ३ वाचे, वाग्भ्याम्, वाग्भ्यः ४ वाचः, वाग्भ्याम, वाग्भ्यः ५ वाचः वाचोः, वाचाम् ६ वाचि, वाचोः वाक्षु ॥

(पान्तोऽप् शब्दः) जल

आपः १ अपः २ अद्भिः ३ अद्भ्यः ४ अद्भ्यः ५ अपाम् ६ अप्सु ७ ॥

(शान्तोदिश् शब्दः) दिशा

दिक्, ग्, दिशौ, दिशः १ दिशम्, दिशौ, दिशः २ दिशा, दिग्भ्याम्, दिग्भिः ३ दिशे दिग्भ्याम्, दिग्भ्यः ४ दिशः दिग्भ्याम्, दिग्भ्यः ५ दिशः, दिशोः, दिशाम् ६ दिशि, दिशोः, दिक्षु ॥

(भाषा बनाओ)

भवतेयमुपानत् कियतामूल्येन क्रीता ? । तिसृभिर्मुद्राभिः । द्यौः शान्तिः । चतस्रोऽवस्था शरीरस्य वृद्धिर्यौवनं सम्पूर्णता किञ्चित्परिहाणिश्चेति । अद्यस्त्रीसमाजे कासांकासां विदुषीनामबलानां व्याख्यानानि भविष्यन्ति ? । श्रीमत्याः सरलादेव्याः सावित्रीदेव्याः प्रियंवदायाश्च । वाचमुवाचकौत्सः । अद्भिर्गात्राणि शुध्यन्ति । चतसृषुदिक्षु परिभ्रम्य समागतोऽहम् ॥

(संस्कृत बनाओ)

आपने यह जूता कितने में लिया है । चार रुपये में । हे

परमात्मन् ! आशाक शान्तिमय हो । देहकी चार दशा होतीहैं वृद्धियौवन सम्पूर्णता और चतुर्थी ह्रासयुक्त । आज-महिला परिषद् में किन २ विदुषी स्त्रियोंके व्याख्यान होंगे?। श्रीमती सरलादेवी सावित्रीदेवी और प्रियंवदाजीके । जल से शरीरके अवयव शुद्ध होतेहैं । चारों दिशामें घूमकर आयाहूं॥

(शान्तो दृश्शब्दः) देखना ।

दृक्, ग्, दृशौ, दृशः १ दृशम्, दृशौ दृशः २ दृशा दृग्भ्याम्, दृग्भिः ३ दृशे दृग्भ्याम्, दृग्भ्यः ४ दृशः दृग्भ्याम्, दृग्भ्यः ५ दृशः, दृशोः, दृशाम् दृशि, दृशोः, दृक्षु ॥

(षान्तस्त्विष्शब्दः) प्रकाश

त्विट्, ड् त्विषौ, त्विषः १ त्विषम् त्विषौ, त्विषः २ त्विषा, त्विड्भ्याम्, त्विड्भिः ३ त्विषे त्विड्भ्याम्, त्विड्भ्यः ४ त्विषः त्विड्भ्याम्, त्विड्भ्यः ५ त्विषः, त्विषोः त्विषाम् ६ त्विषि त्विषोः त्विटत्सु, त्विट्सु ॥

(षान्तः सजुष् शब्दः) साथमें ॥

सजूः, सजुषौ, सजुषः १ सजुषम्, सजुषौ, सजुषः २ सजुषा, सजूर्भ्याम्, सजूर्भिः ३ सजुषे, सजूर्भ्याम्, सजूर्भ्यः ४ सजुषः, सजूर्भ्याम्, सजूर्भ्यः ५ सजुषः सजुषोः सजुषाम् ६ सजुषि सजुषोः सजूःषु, ष्षु ॥ एवमाशीः ॥

(सान्तोऽदस्शब्दः) बहु

असौ, अमू, अमूः १ अमूम्, अमू, अमूः २ अमुया, अमूभ्याम्, अमूभिः ३ अमुष्यै, अमूभ्याम्, अमूभ्यः ४ अमुष्याः, अमूभ्याम्, अमूभ्यः ५ अमुष्याः, अमुयोः, अमूषाम् ६ अमुस्याम्, अमुयोः, अमूषु ॥

इतिहलन्त स्त्रीलिङ्गप्रकरणम् ॥

सहृदयः=दयालु प्रवणः = चतुष्पथ, चौराहा। धावल्यम्= सफेदी। अधीरः = भीरुः। कथङ्कारम् = क्यों। अङ्कः = गोद। साधुवादः = मुबारिकबादी। शुभसंवादः = खुशखबरी। क्षुभितः = व्याकुल। हर्षः = खुशी। विषादः = रंज प्रणिपातः = अदब। प्रकम्पनम् = कांपना। चङ्क्रमणम् = बार२घूमना। तोलनम् = तोलना। मापनम् = नापना। प्रभातम् = प्रातःकाल, सुबह। प्रवरः = श्रेष्ठ, अच्छा।

भाषावनाओ ॥

सहृदयानांमित्राणामुपदेशं हृदि धारयामि। चतुष्पथे सन्ति न वञ्चकास्ते। ददामि साधुवादांस्ते। कीदृशः शुभसंवादः श्रोतुमिच्छामि भोसखे! हर्षविषादौ कथङ्कारं भवतः। अभूत्सनम्रः प्रणिपातशिक्षया। विषं चङ्क्रमणं रात्रौ। प्रभातं

मभूतं तमस्तद्गतम् । वचस्तत्र प्रयोक्तव्यं यत्रोक्तेलभते फलम् । मद्यपानां मांसाशकानां च बुद्धिर्विपरीता भवति, अत एव बुद्धिमद्भिराभ्यां दूरंस्थेयम् ।

संस्कृतबनाओ ॥

मेहरबानमित्रों के उपदेशको हृदयमें धारण करताहूं । बेवञ्चक चौराहेपर नहींहैं । आपकेलिये मुबारिकवादीः देताहूं हे मित्र ! कैसी खुशखबरी है उसको सुनना चाहताहूं । हर्ष विषाद क्यों होता है ? पक्षपातकी शिक्षासे वह नम्र हुआ ॥

अथ हलन्त नपुंसकलिङ्गप्रकरणम् ।

(स्वनडुह् शब्दः) सुन्दर बैल वाला कुल ।

स्वनडुद्-त्, स्वनडुही, स्वनड्वांहि १ स्वडुद् त्, स्वनडुही, स्वनड्वांहि १ ॥ *

(वार् शब्दः) जल

वाः, वारी, वारि ! वाः, वारी, वारि २ वारा, वार्भ्याम् वार्भिः ३ वारे, वार्भ्याम्, वार्भ्यः ४ वारः, वार्भ्याम्, वार्भ्यः ५ वारः, वारोः, वाराम्, ६ वारि, वारोः, वार्षु ७ स० प्रथमावत्

* प्रथमा तथा द्वितीया विभक्ति के जहां केवल रूप लिखे गये हों वहां शेषरूप पुंल्लिङ्गवत् समझना चाहिये ॥

(किम् शब्दः) कौन ।

किम्, के, कानि १ किम्, के, कानि २ ॥

(इदम् शब्दः) यह ।

इदम्, इमे, इमानि १ इदम्, एनत्, इमे, एने, इमानि, एनानि २ ॥

(एतद् शब्दः) यह ।

एतत्, एते एतानि १ एतत्, एते, एतानि २ ॥

(ब्रह्मन् शब्दः) ईश्वर ।

ब्रह्म, ब्रह्मणी, ब्रह्माणि १ ब्रह्म, ब्रह्मणी, ब्रह्माणि २ ॥

(अहन् शब्दः) दिन ।

अहः, अहनी, अहानि १ अहः, अहनी, अहानि २ अह्ना, अहोभ्याम्, अहोभिः ३ अह्ने, अहोभ्याम्, अहोभ्यः ४ अह्नः, अहोभ्याम्, अहोभ्यः ५ अह्नः, अह्नोः, अह्नाम् ६ अह्नि, अह्नोः, अहस्सु ७ स० प्रथमावत् ॥

(दण्डिन् शब्दः) दण्ड ग्रहणकर्त्ता कुल ।

दण्डि, दण्डिनी, दण्डीनि १ दण्डि, दण्डिनी, दण्डीनि २

(सुपथिन् शब्दः) सुपथगामी कुल

सुपथि, सुपथी, सुपन्थानि १ सुपथि, सुपथी, सुपन्थानि २

(ऊर्ज् शब्दः) बलीकुल ।

ऊर्क्-ग्, ऊर्जी, ऊर्न्जि १ ऊर्क्-ग्, ऊर्जी ऊर्न्जि २ ऊर्जा, ऊर्ग्भ्याम्, ऊर्ग्भिः ३ ऊर्जे, ऊर्ग्भ्याम् ऊर्ग्भ्यः ४ऊर्जः ऊर्ग्भ्याम्, ऊर्ग्भ्यः ५ ऊर्जः ऊर्जोः, ऊर्जाम् ६ ऊर्जि,ऊर्जोः ऊर्क्षु ७ स० प्रथमावत् ॥

(तद् शब्दः) वह

तत्, ते, तानि, १ तत्, ते, तानि २

(यद्शब्दः) जो

यद्, ये, यानि १ यद्, ये, यानि २

(शकृत् शब्दः) विष्ठा

शकृत्, शकृती, शकृन्ति १ शकृत्, शकृती, शकृन्ति२शकृता, शकृद्भ्याम्, शकृद्भिः ३ शकृते, शकृद्भ्याम्, शकृद्भ्यः ४ शकृतः, शकृद्भ्याम्, शकृद्भ्यः ५शकृतः, शकृतोः शकृताम् ६ शकृति, शकृतोः शकृत्सु, स० प्रथमावत् ॥

(ददत् शब्दः) देताहुआ कुल

ददत्-द्, ददती, ददन्ति-ददति १ ददत्-द्, ददती, ददन्ति-ददति २

(तुदत् शब्दः) पीड़ा देताहुआ कुल

तुदत्-द्, तुदन्ती, तुदती, तुदन्ति १ तुदत्-द्, तुदन्ती-

तुदती, तुदन्ति २ शेषरूप ददत् शब्दके समान।

(भात् शब्दः) प्रकाश

भात्-द्, भाती भान्ती, भान्ति, १ भात्-द्, भान्ती-भाती, भान्ति २ शेष रूप तुदत् पुंवत्॥

(पचत् शब्दः) पकाताहुआ कुल

पचत्, पचन्ती, पचन्ति १ पचत् पचन्ती, पचन्ति २

(दीव्यत् शब्दः) खेलताहुआ कुल

दीव्यत्-द्, दीव्यन्ती, दीव्यन्ति १ दीव्यत्-द्, दीव्यन्ती दीव्यन्ति २ शेष रूप तुदत् वत्॥

(धनुष् शब्दः) चाप।

धनुः धनूषी, धनूंषि १ धनुः, धनुषी, धनूंषि २ धनुषा धनुर्भ्याम्, धनुर्भिः ३ धनुषे, धनुर्भ्याम्, धनुर्भ्यः ४ धनुषः, धनुर्भ्याम्, धनुर्भ्यः ५ धनुषः, धनुषोः, धनुषाम् ६ धनुषि, धनुषोः, धनुःषु-धनुष्षु ७ स० प्रथमावत्॥

इसीप्रकार चक्षुष् (आंख) हविष् (होमकी सामग्री) पयस् (जल) ओकस् (स्थान) शब्दों के रूप होते हैं॥

(सुपुंस् शब्दः) श्रेष्ठ पुरुषोंका कुल

सुपुम्, सुपुंसी, सुपुमांसि १ सुपुम्, सुपुंसी, सुपुमांसि २ सुपुंसा, सुपुंभ्याम्, सुपुंभिः ३ सुपुंसे, सुपुंभ्याम्, सुपंभ्यः ४

सुपुंसः सुपुंभ्याम्, सुपुंभ्यः ५ सुपुंसः, सुपुंसोः सुपुंसाम् सुपुंसि, सुपुंसोः, सुपुंसु ७ स० प्रथमावत् ॥

(अदस् शब्दः) वह

अदः, अमू, अमूनि १ अदः, अमू, अमूनि २

इति हलन्तनपुंसकलिङ्गाः शब्दाः समाप्ताः ॥

याचनम् = मांगना । नर्त्तनम् = नाचना । कर्त्तनम् = काटना । निक्षेपणम् = फेंकना । प्रेषणम् = भेजना । वादनम् = बजाना । शयनम् = सोना । जागरणम् = जागना । अवलम्बनम् = सहारा । करणम् = करना । मरणम् = मरना । धरणम्=धरना । अध्ययनम्=पढ़ना । अध्यापनम् = पढ़ाना । मानम्=तौलना । दर्शनम्=देखना । निष्क्रमणम्= निकलना । प्रवेशनम्=घुसना । अवगुण्ठनम् = घूंघट । लुण्ठनम् = लेटना । आरोहणम्=चढ़ना । लम्बनम् = लटकना ॥

अङ्गीकृतं सुकृतिनः परिपालयन्ति = अच्छे पुरुष अपने कौल को पूरा करते हैं । परोपकाराय सतां विभूतयः = सज्जनों का ऐश्वर्य दूसरों की मदद के लिये होता है । अधि-

कस्याधिकं फलम्=अधिक का अधिक फल होता है।

अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति=बुरे रास्ते पर चलनेवाले को भाई भी छोड़ देता है। अल्पविद्योमहागर्वी=थोड़ी विद्यावाला बहुत घमण्डी होता है। अविद्याजीवनं शून्यम्=विना विद्या के जीना वेफायदा है। अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः=चञ्चल चित्तवाले पुरुष की प्रसन्नताभी डर को पैदा करने वाली होती है।

कस्यचित् किमपि नो हरणीयम्=किसीका कुछ भी न चुराना चाहिये। कुगेहिनीं प्राप्य गृहे कुतः सुखम्?=खोटी औरत को पाकर घर में कहां सुख। क्षितितले किं जन्म कीर्ति विना=भूमि पर विना यश के जन्म निष्फल है। गतं न शोचामि कृतं न मन्ये=गये हुये का शोच नहीं करता और किये हुये का घमण्ड नहीं करता॥

हितं मनोहारि च दुर्लभं वचः=हित करनेवाला और मन को आनन्द देनेवाला वचन दुर्लभ है। गुणी गुणंवेत्ति न वेत्ति निर्गुणः=गुणी गुणको जाना करता है निर्गुणी नहीं। चिन्ता समं नास्ति शरीरशोषणम्=फिक्र के बराबर और कोई देह को सुखानेवाला नहीं है।

छिद्रेष्वनर्था बहुली भवन्ति = थोड़े दुःख में बहुत दुःख समुपस्थित होजाते हैं। दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् = जहांपर मेडक व्याख्याता हों वहां पर चुप रहना ही अच्छा है। नये च शौर्ये च वसन्ति सम्पदः = न्याय और शूरतामें ही धन रहता है। निर्वाणदीपे किमु तैलदानम् = दीपकके समाप्त होजाने पर तेल देना निष्फल है। मतिरेव बलाद्गरीयसी = बुद्धि बलसे भी बड़ी है। मूर्खस्य किं शास्त्रकथा प्रसङ्गः = मूर्खको शास्त्रकी कथासे क्या। रक्षन्ति पुण्यानि पुराकृतानि = प्रथम किये हुये पुण्य रक्षा करते हैं। विद्या समं नास्ति शरीरभूषणम् = विद्याके बराबर और शरीरका जेवर नहीं है। विनाशकाले विपरीतबुद्धिः = कष्ट होनेके समय बुद्धि उलटी होजाती है सम्पूर्णकुम्भो न करोति शब्दम् = पूरा भरा हुआ घड़ा शब्द नहीं करता। संसर्गजा दोषगुणा भवन्ति = सोहबतसेही दोष और गुण होते हैं। अर्द्धो घटो घोषमुपैति नूनम् = आधाघड़ा जरूरही बोलताहै न पर्वताग्रे नलिनी प्ररोहति = पहाड़की चोटीपर कमलिनी नहीं पैदा होती। अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य = पीड़ित पुरुषकी पुष्टि अन्धे की दृष्टि के समानहै।

साधारणोपदेशः।

ईश्वरः सर्वव्यापकोऽस्ति । यौष्माकीणानि समानि कार्याणीश्वरः पश्यति[1] तेन किमप्यज्ञातंनास्ति । तद्गृहं शीघ्रं नश्यति यास्मिन् गृहे सदा कलहोभवति । सज्जना यत्कर्मारभते तन्मध्ये न त्यजन्ति । विपदि धैर्यमेव सहायतां ददाति । विद्यासमं नास्ति धनं जगत्याम् । प्रतिवासिभिः सहमेलनं रक्षणीयं जनैः समैश्चसह बन्धुवद् वर्तितव्यम् । शरीरं पवित्रं रक्षणीयं पवित्रैर्बालकैः सह समेजनाः स्नेहं कुर्वन्ति । अधर्मेण यद् धनमर्ज्यते तन्नातिष्ठति यथाऽऽगच्छति तथैव गच्छति ।

साधारणोपदेशः (२)

कश्चिदपिजीवो न क्लेशनीयः, यथात्मनि सुखदुःखे भव-स्तथैव सर्वत्र विज्ञेयम् । यः शुद्धभावेन कार्यं करोति जग-दीश्वरस्तस्य सहायतां करोति । परोपकारिणो जनाः सुखि-नो भवन्ति । योऽन्येषां वृद्धिं दृष्ट्वा विषीदति स सर्वदा दुःखं लभते । यत्कार्यं स्वकीयेऽधिकारेभवेत् तत्सत्यतया कार्यम् । यो युष्माकं विश्वासं कुर्यात्तेन सह बिश्वासघातो-

१ इकट्ठा कियाजाता है ॥

न कर्तव्यः। कटुभाषणं कदापि न विधेयम्, कटुवचनं शायकवद्[1] हृदि क्षतं करोति। दुर्जनानां सङ्गतिः कदापि न कर्तव्या, अनया हानि रेव भवति न च लाभः। दुर्जनाः स्वमित्रैः सहविश्वासघातं[2] कुर्वन्ति, अतएव इत्थंभूतेषु नरेषु विश्वासो न विधेयः। धर्मकार्येषु विघ्नाबाहुल्येन भवन्ति, अत एव तत्करणे विलम्बो न कर्तव्यः।

साधारणोपदेशः (३)

शुभकर्मणां शुभं फलं भवति, अशुभकर्मणां चाशुभम्। मित्रं तदेवास्ति यदापत्काले न विजहाति[3]। शत्रुर्मधुरालापमपि[4] कुर्यात्तथापि तस्य विश्वासो न कार्यः। महतामाज्ञा सर्वदा मन्तव्या, अनेनैव युष्माकं कल्याणमस्ति। अविचार्य[5] किञ्चिदपित्कार्यं न कार्यम्, नतु पश्चात्पश्चात्तापं करिष्यथ। असत्यं न भाषणीयम्, असत्यभाषिणां[6] कश्चिदपि विश्वासं न करोति। सविद्यस्य[7] नरस्य सर्वत्र प्रतिष्ठा भवति, मूर्खस्य[8] चाऽप्रतिष्ठा भवति। सर्वेषां शुभचिन्तकतायां स्थैर्यं न चाऽशुभचिन्तकतायाम्। मरणान्ते पापपुण्यमन्तरा[9] नान्यत् सत्रा गच्छति। सर्वैः सह मधुरालापेन भाव्यं कटुवचनं केनापि सहनोच्चारणीयम्॥

---

१ घाव। २धोखादेना। ३ छोडताहै। ४मीठा बोलना। ५बिना विचारके। ६झूठ बोलने वालोंका। ७पढ़े लिखेका। ८ मूर्खकी। ९बिना।

साधारणोपदेशः (४)

सद्गुणैर्मनुष्याः पूज्यन्ते गुणमन्तरा कस्या प्यादरो न भवति। यथा शुकान् सारिकाश्च[1] जनाः पालयन्ति न च कोकान्[2]। शिक्षाप्रदानि वाक्यानि न रोचन्ते[3], इदं प्रायकं दृष्टम् यथा यावत्कटुकं भेषजं न पीयते तावद् ज्वरो न नश्यति। महतां समीपे निवासेन लघवो[4]ऽपि महीयन्ते[5], इदं प्रत्यक्षमस्ति यथा लता वृक्षसदृशी वर्धते। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये। पयः पानं भुजङ्गानां[6] केवलं विषवर्धनम्। पापकर्माणि कृत्वा कश्चित् सुख न कामयेत[7] स कथं सुखभाग्[8] भवेत्, यथा-अर्कवृक्षा[9]रोपणेन किमसौ आम्रो भवितुमर्हति अपितु न

साधारणोपदेशः (५)

वेदः सत्यविद्यानां पुस्तकमस्ति तस्य पठनं पाठनं श्रवणं श्रावणं च मनुष्यमात्रस्य परमधर्मोऽस्ति। सत्यग्रहणकरणे असत्यस्य च परित्यागे सर्वदा सर्वैरुद्यतेन भाव्यम्। सर्वाणि कर्माणि धर्मानुसारेण सत्यमसत्यं च विचार्य कर्तव्यानि। सर्वैः सद्भावपूर्वकं धर्मानुसारेण यथायोग्यं वर्त्तितव्यम्॥ शिशवः! प्रभातमुत्थाय प्राणीश्वरस्य ध्यानं कुरुत येन युष्म-

१ मैना। २ कव्वोंको। ३ अच्छे लगते हैं। ४ छोटे। ५ बड़े होजाते हैं। ६ सांपोंका। ७ चाहे। ८ सुखी। ९ आकड़ेका पेड़।

दर्थं नाना[1]विधानि वस्तूनि विरचितानि[2] । प्रातरुत्थाय यत्कार्यं क्रियते तस्मिन्मनः सम्यग् लगति । यथा पठनं प्रभाते भवति न तथेतरस्मिन् काले संजायते । प्रातःकालेयत् स्मिर्यते न तच्छीघ्रं विस्मिर्यते, बुद्धिश्च विवर्धते ।

साधारणोपदेशः (६)

उपहासो[3] वैरस्य मूलमस्ति, अत एवोपहासः केनापि सह न कर्तव्यः । यदि कश्चिद् युष्माकमुपहासं कुर्यादेवं वैरं च मन्येत तथापि युष्माभिर्नैवं कार्यम्, एवमेव करणेन युष्माकं कल्याणं भविष्यति । यो नरोऽनुपकारे[4] उपकारं[5] करोति स उत्तमः, योऽनुपकारेऽनुपकारं करोति स मध्यमः, यश्चोपकारेऽनुपकारं कुरुतेऽसौ नीचः । मातापित्राचार्याणां ये बालका आज्ञां मन्तारस्त एव सुखं भोक्तारो भवन्ति । अभिवादनशी[6]लस्य नित्यं वृद्धोपसेविनः । चत्वारि तस्य वर्धन्त आयुर्विद्या यशोबलम् । निम्नलिखितानां महानुभावानां जीवनचरितानि पाठितुं योग्यानि । श्रीयुत शिवराजस्य महाराजप्रतापस्य विक्रान्तस्य रणजीतसिंहस्य । वेदमतप्रचारकस्य स्वामिदयानन्दस्य च ॥

१ बहुत तरह के । २ बनाये हैं । ३ हँसीठट्ठा । ४ बुराई । ५ भलाई । ६ प्रणाम कर्ता की ।

साधारणोपदेशः (७)

दुःखे केवलमीश्वर एव साहाय्यं करोति। तेनैव, अस्मदीयानि शरीराणि मातुरुदरे विरचितानि। तेनैव च सकलानीन्द्रियाणि दत्तानि। यैरिन्द्रियै रूपरसगन्धस्पर्श शब्दादीन् विषयान् गृह्णीमः। यथा नेत्रेण रूपं पश्यामः। जिह्वयारसमास्वादामहे। नासिकया गन्धं जिघ्रामः। त्वचा स्पर्शं विजानीमः। श्रोत्रेण शब्दं शृणुमः। इमानि विश्वानीन्द्रियाणि ज्ञानसाधनानि सन्ति। नेत्रे विकारेसति वयं द्रष्टुमसमर्थाः। सर्वं जगद् ध्वान्तमयं प्रतीयते। रसनायां विकारे सति मधुराम्ललवणकटुकषायतिक्तरसान् विज्ञातुमसमर्थाः। एवमेव सर्वत्र विज्ञेयम्। य इत्थमुपकर्त्ता किं तस्याज्ञा नहि मन्तव्या? अपितु, अवश्यमेव मन्तव्या स्वप्नेऽपिनविस्मर्तव्या॥

साधारणोपदेशः (८)

धर्मस्य सार्वभौमानि कानि लक्षणानि? इति जिज्ञासा वर्तते। धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीराविद्यासत्यमक्रोधो दशकं धर्मलक्षणम्॥ १॥ वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥ इति मनुमहाराजेन धर्मचिह्नानि प्रदर्शितानि। किमेतानि सार्वजनीनानि, उताहो विरुद्धानि?

विज्ञानदृष्ट्यातु सार्वजनीनानि परन्त्वन्धपरम्परयाग्रहदोष-दुष्टया विरुद्ध विथ्यथाचेदं सकलं प्रतीपं प्रतीयते । वेदविहितानि च यानि कर्माणि सन्ति तानिसार्वजनीनानि न तत्र पक्षपातत्वं मत्वरेण नरेण कदापि विज्ञेयम् ॥

(पुत्र्याः पित्रे पत्रम्) प्रयागतः ।

श्रीमनज्ञानध्वान्तनिवारक ! विज्ञानप्रकाशक ! प्रेमाकर ! परमपूज्यतम ! पितः ! अभिवादये

भवन्तमिमं हर्षप्रदं समाचारं श्रावयामि-वार्षिक्यां परीक्षायां सर्वासु कन्यकास्वहं प्रथमां संख्या सम्प्राप्तास्मि,पारितोषिके मह्यं पञ्चरूप्यकाणि विश्वेषां वेदानां समानि पुस्तकानि कौशेयवस्त्रसंवेष्टितानि च मिलितानि येनदानी महमतीव संहृष्टास्मि नूतनायां कक्षायामधुना मे प्रवेशो भविष्यति, अतएव नव्यानां पुस्तकाना मावश्यकता भविष्यति तदर्थं विंशतिमुद्राः प्रेषणीयाः । मातुश्चरणौ संगृह्य मुहुर्मुहुः प्रणमामि–शेषं कुशलम् ।

भावत्की पुत्री प्रियंवदा

माघशुक्ला १९ १९६७ वि०

---

१ अन्धकार । २ प्रेमकाखान । ३ रशमी । ४ खुशहूं । ५ आपकी ।

मित्राय-पलाशम्। कर्णपुरतः।

प्रियतमाय सहृदयाय सुहृज्जनाय धर्मदत्ताय नमोऽस्तु। सखे! अद्यप्रभाते भावत्कं पलाशं समुपलब्धम् अधीच च सकलः समाचारोऽवबोधि।

आत्मनीनां परीक्षोत्तीर्णतां समाकर्ण्य प्रसीदामि परन्तु भावत्कीमनुत्तीर्णतां विज्ञाय विषीदामि। अधुना पश्चात्तापकरणेन किं भवति यद् भूतं तद् भूतम्। 'हेयं दुःखमनागतम्' अनागतानि च यानि दुःखानि तेषां दूरीकरणाय नरेण प्रवरेण प्रयतितव्यमिति। येऽश्वारोहा भवन्ति त एव तु पतन्ति न च पेष्टूयः। नेदमवेद्यं कार्यं यत्र च लज्जेत भवान्। स्वकीयान् वर्तमानान् विचारान् विहाय पुनरपि विद्यालयगमनेन भाव्यमितिशम्॥

भवत्सखः-

त्रिविक्रमः। चैत्र शुक्लापञ्चमी १ १९८७ वि०

कथा प्रथमा (१)

जले प्रतिविम्बितस्य शुनः।

कश्चिच्छ्वा मुखेऽपूपशकलं धृत्वा नद्याः परं गच्छन्नन्त-

१ पड़कर। २ सब। ३ जाना। ४ अपनी। ५ सुनकर। ६ प्रसन्न हूं। ७ आपकी ८ फेल। ९ दुखी हूं। १० श्रेष्ठ। ११ सवार। १२ पीसनेवाली। १३ निन्दित। १४ कोई कुत्ता। १५ पुवे के टुकड़े को। १६ जाता हुआ॥

रात्मनः प्रतिबिम्बं तोयेऽपश्यत् । तदाऽसौऽचिन्तयत्—'यद-यमपरः कुक्कुरोऽपूपखण्डं गृहीत्वा गच्छति ' इति । तस्मात्तं शकलं जिघृक्षुर्लोभेन मुखमपावृत्य तदादातुं यावत् प्रवृत्त-स्तावत्तन्मुखादपूपशकलमुदके पतितं तन्नद्यां जगाम । पुनः स तन्न लेभे ॥

तात्पर्यम् ।

य ईश्वरेण दत्तेऽर्थे सन्तोषमनवाप्याऽन्यस्यार्थं गृहीतुं वाञ्छति तस्येतरस्माल्लाभो न जायत एव । अन्यच्च स्वीयोऽर्थोऽपि नश्यति ॥

कथा द्वितीया (२)

जम्बुकद्राक्षाफलानाम् ।

कश्चिज्जम्बुकः क्षुत्क्षामकण्ठः परिभ्रमन् द्राक्षामण्डपमभ्यैत् तत्रागत्योर्ध्वं विलोकयता तेन बहवो दर्शनीयाः पक्वफलानां स्तवका लम्बमाना अदर्शिषत । परं च मण्डपस्योच्छ्रितत्वयैकमपि फलं न विविन्दे । उत्पतंस्तु शश्राम । अन्ततः किं

१ अपनी परछाईं । २ जल में । ३ कुत्ता । ४ पकड़ने वाला । ५ मुखको खोलकर । ६ लगा । ७ दिये हुये पदार्थ में । ८ सन्तुष्ट न होकर । ९ दूसरे से ॥ १० स्यार अंगूरोंका । ११ भूखसे घबड़ाया हुआ । १२ सुन्दर । १३ लटकते हुये । १४ देखे । १५ ऊंचे होनेसे । १६ आखिरकार ॥

यद्दूरं गत्वा पश्चाद्द्राक्षामण्डपे दृष्टिविधाय भर्त्सनापूर्वमिदमाह " गृह्णातु नाम कोऽप्येतानि फलानि । अहंत्वपक्कान्यम्लानीति संत्यज्य गच्छामि ।

तात्पर्यम् ॥

केचन नरा अलभ्यवस्तुनि कमपिदोषमारोप्यात्मनो लघिमानं छादयन्ति । नेदं साधुकृत्यम् ॥

कथा तृतीया (३)

आदित्यक्रमेलयोः ।

एकदा कश्चित् क्रमेलक आदित्यं सप्रश्रयं याचितवान्-"भो आदित्य ! यथा गोमहिषादयः शृङ्गिणः कृता भवता तथा किमहं न क्रिये । विषाणैराभिरहं शत्रुभ्यस्त्राणं विधास्यामि । एतां मे विज्ञप्तिं श्रोतुमर्हति देवः" । तं भगवानादित्योवदाति " रे मूढ ! यन्मया तुभ्यं दत्तं तदलं विचार्यैव दत्तम् । तेन सन्तुष्टेन त्वया भाव्यम् । तदकृत्वा यदन्यस्मै दत्तं तत्पुरस्कृत्य तद्याचसे । अस्य धृष्टत्वस्य दण्डं तद्धामुहि । तव कर्णौ ह्रस्वौ । भविष्यतस्त्वं चातिभार वाहको भविष्यसि" ॥

तात्पर्यम् ।

अस्मिञ्जगतीशेन यद्यद्दत्तं तत्तदुपपन्नमेव । ये तदन्यथा

१ झिड़का के साथ यह बोला । २ कच्चे और खट्टे । ३ कोई । ४ न प्राप्त होने योग्य पदार्थ में ५ दोषलगाकर । ६ अपनी । ७ क्षुद्रभावको ८ ढांकते हैं ॥ ९ सूर्य और ऊंटका । १० प्रेमके साथ । ११ सींगोंसे । १२ बचाव १३ उचित है

कर्तुं यतन्ते तेऽसमीक्ष्यकारिणो मूढा इति वक्तव्यम् । ईदृशानामुपाया निष्फला भवन्ति । अपि च ते दुःखभाजो भवन्ति

कथा चतुर्थी (४)

पात्रयोः ।

मृत्पात्रं रीतिपात्रं च नद्यास्तीर आस्ताम् । ऊर्ध्वप्रदेशादागतेन पूरेणोह्यमानयोस्तयोर्मृत्पात्रं चिन्तापरं बभूव । रीतिपात्राभिघाते संवृत्तेऽहं भङ्क्तास्मि' इति । दुःखितं तद्दृष्ट्वा रीतिपात्रं तदुवाच "भोः, मा बिभीहि ! अहं त्वां रक्षिष्यामि" इति । मृत्पात्रं तदवदत्—भ्रातर्दूरत एव मां प्रतिमर्षस्व । त्वत्तोऽहमतीव बिभेमि । यतः परस्पराभिघाते नाशो ममैव भविष्यति ॥

तात्पर्यम् ।

श्रीमता सार्धं सम्बन्ध आसंभावो वा दरिद्रं विपदि पातयति । श्रीमतः प्रातिवेश्य कलहेऽयं कलहं करोतु, स वा कलहं करोतु, दरिद्र एव नश्यति ॥

---

१ विचारशून्य । २ दुःखके भागी । इति । ३ पीतलका वर्तन । ४ ऊपरकी ओरसे आये हुयेसे । ५ जलके समूहसे । ६—पीतलके पात्रका धक्का लगनेपर ७ टूटर । ८ कहिये । ९ विश्वासका होना ॥

कथा पञ्चमी (५)

हंसीमनुजयोः।

कस्यचिन्मनुजस्यावासे एका हंसी बभूव। सा प्रत्यहं[1] स्वर्णस्यैकमण्डं[2] निचिक्षेप[3]। तद्गृह्णतस्तस्याशोपचितिरिष्टा[4]। परं तया उपचयोऽभवत्। सोऽचिन्तयत्-"अण्डनिर्गमस्थानमासाद्[5]येयमपारं धनमेकपद एव लभेय[6]"। तदा स तस्या उदरं विदारयामास[7]। ततो यावदन्तरवलोकयति[8] तावद्रिक्तं[9] मेव ददर्श। पश्चाद् बहुतप्यत[10]॥

तात्पर्यम्।

ईश्वरो जगदात्मा यं प्रति त्यागभोगपालं भविष्णुं[11] धनं ददाति तस्य संग्रहेच्छा चेन्मितव्ययेन[12] तस्मादेव किञ्चित् स उद्धरेत्[13]। इदमनादृत्य[14] योऽतिलोभेनाऽकाण्डे[15] श्रीमान भवितुमीहमानो[16] महति साहसे[17] आत्मानं योजयति स साहसे बद्ध[18] प्रयत्नो भूत्वा मूलधनमपि हारयति[19]॥

---

१ नित्य। २ सोनेका। ३ छोड़तीथी। ४ मनोरथहानिइष्टथी। ५ प्राप्तकर्के। ६ लेऊं। ७ फाड़डाला। ८ देखताहै। ९ खाली। १० बहुत दुःखीहुआ। ११ होनहार। १२ उचितखर्चकरनेसे। १३ निकाले। १४ अनादरकरके। १५ विनासमयके। १६ चेष्टाकरता हुआ। १७ बिना विचारे। १८ प्रयत्नमें बन्धाहुआ। १९ खोबैठता है॥